चतुर्थः पाठः

# बिलासा

रतनपुरस्य जनपदान्तर्गते शताधिकवर्षपूर्वं 'लगरा' इति ग्रामात् स्वपत्न्या सह जीवकोपार्जनार्थं 'परसू' नाम्नः कैवर्त्यः निर्गतः। तौ अरपानद्याः तटे अतिष्ठताम्। अरपायाः तटे एकः लघुग्रामः आसीत्। परसू अरपानद्यां प्रतिदिनं मत्स्याखेटं करोति स्म। कालान्तरेण तस्य भार्या बैसाखा एकां स्वस्थां बालाम् अजनयत्। सा बालिका लावण्यवती आसीत्। लावण्येन तस्याः 'बिलासा' इति नामकरणमभवत्।

बिलासा शैशवकाले बाला बालैः सह क्रीडति स्म। तस्यै बालकानां क्रीडनकं क्रीडनं च रोचते स्म। बिलासा अदम्य–साहसिका आसीत्। एकदा सुप्तं बालं नीत्वा वृक्कः पलायनं कुर्वन् आसीत्। तदा बिलासा वृक्कं दण्डेन ताडयित्वा बालकं मुक्तं कृत्वा मातरं समार्पयत्। बालकैः सह बिलासा मल्ल–कौशलं शिक्षते स्म। तं साहसं दृष्ट्वा जनैः तस्याः दलायग्रामरक्षणस्य दायित्वं प्रदत्तम्।



यदा वर्षाकाले अरपानद्यां जलप्लावनं जातम्। तदा बिलासा नौकया जनान् संतारयति स्म। एवमेव सा नौकाचालनेऽपि पारङ्गता जाता। सा लोकनृत्यगीतयोः अपि सिद्धा आसीत्। ग्रामस्य सर्वेषु कार्यक्रमेषु सा अग्रसरासीत्।

कालान्तरे बिलासायाः विवाहः बंशी नाम्ना युवकेन सह अभवत्। बिलासा प्रतिदिनं 'चार–तेन्दू' इति वन्यफलानि संग्रहणार्थं गच्छति स्म। तथा च बंशी महिषचारणाय वनं प्रति अगच्छत्। यदा सायंकाले बिलासा पत्या साकं गृहं प्रति न्यवर्तयत् तदा सहसा आखेटाय भ्रमतः राज्ञः कल्याणसायस्योपरि एकः व्याघ्रः आक्रमणं कृतवान्। तं विलोक्य बिलासा व्याघ्रम् कुन्तेन प्रहार्य राज्ञः प्राणान् अरक्षयत्। अनया कल्याणसायः बिलासया प्रभावितो भूत्वा अपरं दिवसं अरपानद्याः द्वयोः तटयोः 'जागीर' बिलासायै दत्तवान्। तथा च राजा रतनपुरं प्रत्यागतः। अनन्तरं तां खड्गेन अलंकृत्य 'महिला–सेनापति' इति पदे न्ययोजयत्।

बिलासा स्वप्रयत्नेन ग्रामस्य विकासः कृतवती। तस्याः वर्धमानं प्रभावं दृष्टवा प्रतिवेशिनः राज्यानि तस्याः क्षेत्रे आक्रमणं कृतवन्तः। तैः सह बिलासा साहसेन युद्धम् अकरोत्। सा राज्यरक्षा कुर्वती वीरगतिं प्राप्तवती। राज्ञः कल्याणसायेन मत्स्याखेटकानां निवासस्थलं बिलासायाः सम्मानार्थं 'बिलासापुरम् इति नाम्ना प्रथितम्। वर्तमाने इदं बिलासपुरं छत्तीसगढस्य न्यायधानी अस्ति।

बिलासा स्वकार्येण न केवलं स्वसमाजे अपितु समस्त–छत्तीसगढप्रान्ते सम्मानीतास्ति। सम्प्रति छत्तीसगढसर्वकारेण मत्स्यपालनक्षेत्रं प्रोत्साहनार्थं तया नाम्ना 'बिलासाबाई केंवटिन' इति पुरस्कारः प्रतिवर्षः दीयते। अपि च तया नाम्ना बिलासपुरे बिलासातालः, बिलासा कन्या–स्नातकोत्तर–महाविद्यालयः बिलासाचतुष्पथः प्रभृतयः गौरवान्विताः सन्ति। एवमेव छत्तीसगढस्य पूज्या बिलासा साहस–शौर्य–कर्मनिष्ठाक्षेत्रेषु आदर्शभूतास्ति।

## शब्दार्थाः

| | | |
|---|---|---|
| निर्गतः | = | निकला |
| अजनयत् | = | जन्म दिया |
| लावण्य | = | सुंदर |
| क्रीडनकम् | = | खिलौना |

| | | |
|---|---|---|
| वृक्कः | = | भेड़िया |
| मल्लकौशलं | = | युद्ध कौशल |
| जलप्लावनं | = | बाढ़ |
| संतारयति | = | पार–लगाना |
| पारङ्गता | = | कुशल (दक्ष) |
| अग्रसरा | = | आगे आने वाली |
| निवर्तयति | = | लौटती है। |
| आखेटाय | = | शिकार के लिए |
| विलोक्य | = | देखकर |
| प्रहार्य | = | प्रहार करके/वार करके |
| प्रत्यागतः | = | लौट आया |
| अलंकृत्य | = | सम्मानित करके |
| कुर्वती | = | करती हुई |
| सम्प्रति | = | अभी |
| चतुष्पथः | = | चौराहा |

## अभ्यासः

1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत–

(क) परसू कुत्र मत्स्याखेटं करोति स्म?

(ख) जनैः तस्याः दलाय कस्य दायित्वं प्रदत्तम्?

(ग) बिलासायाः विवाहः केन सह अभवत्?

(घ) राजा बिलासां कस्मिन् पदे न्ययोजयत्?

(ङ) मत्स्यपालनक्षेत्रे कः पुरस्कारः दीयते?

## 2. निर्देशानुसारेण उत्तराणि लिखत।

"बिलासा स्वप्रयत्नेन ग्रामस्य विकासः कृतवती। तस्याः वर्धमानं प्रभावं दृष्ट्वा प्रतिवेशिनः राज्यानि तस्याः क्षेत्रे आक्रमणं कृतवन्तः। तैः सह बिलासा साहसेन युद्धम् अकरोत्। सा राज्यरक्षा कुर्वती वीरगतिं प्राप्तवती।राजा कल्याणसायः मत्स्याखेटकानां निवासस्थलं बिलासायाः सम्मानार्थं 'बिलासपुरम्' इति नाम्ना प्रथितम्। वर्तमाने इदं बिलासपुरं छत्तीसगढस्य न्यायधानी अस्ति।

### अ. रिक्तस्थानानि पूरयत –

(क) सा राज्यरक्षा कुर्वती ..........................प्राप्तवती।

(ख) बिलासपुरं ..................................न्यायधानी अस्ति।

### ब. रेखाङ्कितपदानां प्रत्ययं पृथक् कुरुत।

### स. उक्तानुच्छेदानुसारेण तृतीयाषष्ठयोः विभक्तीनां पदानां चित्वा वचनानि लिखत–

### द. "सा राज्यरक्षा कुर्वती वीरगतिं प्राप्तवती।" वाक्ये।

(क) 'सा' इति सर्वनामपदं कस्य संज्ञापद–स्थाने प्रयुक्तः।

(ख) "प्राप्तवती" इति क्रियापदस्य कर्तृपदं लिखत।

## 3. संधि विच्छेदं कुरुत –

मत्स्याखेटम् =

कालादनन्तरम् =

नौकाचालनेऽपि =

व्याघ्रोपरि =

## 04 उदाहरणानुसारेण क्रियापदानि परिवर्तयत –

उदाहरण–बालकः क्रीडति स्म। बालकः अक्रीडत्।

(क) बिलासा सन्तारयति स्म। .........................................।

(ख) बंशी वनं प्रति गच्छति स्म।.........................................।

(ग) सा रक्षति स्म। .........................................।

(घ) ग्रामस्य विकासः करोति स्म। .........................................।

(ङ) बालिका नृत्यति स्म। .........................................।

R1T2N7

————000————